दिनाङ्क : 11/01/2025 सायम् - 06:20

**मुख्यवार्ता:**

- प्रधानमन्त्रिणा नरेन्द्रमोदिना उक्तं यत् विकसित-भारत-युव-नेतृसंवादः देशस्य यूनः राष्ट्रस्य विकासयात्रायां सम्मिलितुम् अद्वितीयः उपक्रमः अस्ति। प्रधानमन्त्री श्वः त्रि-सहस्र-युवनेतृभिः सह संवादं करिष्यति।
- गृहमन्त्री अमित-शाहः देशे मादक-पदार्थनां समस्यायाः निराकरणाय केन्द्रस्य राज्य-सर्वकाराणां च दृढ-प्रयासानाम् आह्वानम् अकरोत् ।
- अयोध्यायां श्रीराम-जन्मभूमि-मन्दिरे प्राण-प्रतिष्ठायाः वर्षपूर्तौ त्रि-दिवसीयः प्रतिष्ठा द्वादशी उत्सवः अद्य आरब्धः।
- उत्तर-भारतं शीतेन प्रभावितं वर्तते । लद्दाखे तापमानं शून्यत: एकतिरंशत्-डिग्री-सेल्सियस् मितं न्यूनतां गतम्।
- मलेशिया-ओपन्-बैडमिण्टन् प्रतिस्पर्धायां पुरुष-युगल-वर्गे उपान्त्यचक्रे दक्षिण-कोरिया-दलेन भारतस्य सात्विक-साई-राज-रेंकी-रेड्डी चिरागशेट्टि इत्यनयोः युगलं पराजितम्।

**प्रधानमन्त्री युवदिवसः**

प्रधानमन्त्रिणा नरेन्द्रमोदिना उक्तं यत् विकसित-भारत-युव-नेतृसंवादः देशस्य यूनः राष्ट्रस्य विकासयात्रायां सम्मिलितुम् अद्वितीयः उपक्रमः अस्ति। श्रीमोदिना अद्य युव-कार्याणां क्रीडा-राज्य-मन्त्रिणा रक्षा खडसे इत्यनया पञ्चविंशत्यधिक-द्वि-सहस्र-तम-वर्षस्य राष्ट्रिय-युव-महोत्सवस्य विषये विकसित-भारत-युव-नेतृसंवादविषये च लिखितः एकः लेखः प्रसारितः। प्रधानमन्त्री अवदत् यत् एषः कार्यक्रमः विकसित-भारतस्य दृष्टिम् साकारं कर्त्तुं यूनां मस्तिष्कोर्जाम्, सृजनशीलताम्, नेतृत्वं च दिशा प्रदानं वर्तते। प्रधानमन्त्री नरेन्द्रमोदी श्वः राष्ट्रिय-युव-दिवसस्य अवसरे नवदिल्ल्यां पञ्च-विंशत्यधिक-द्वि-सहस्र-तम-वर्षस्य विकसित-भारत-युव-नेतृ-संवादे त्रि-सहस्र-युवनेतृभिः सह संवादं करिष्यति। विकसित-भारत-युव-नेतृ-संवादस्य प्रथमे दिने केन्द्रीय-युव-कार्यक्रम-क्रीडा-मन्त्री डॉ0 मनसुख- मांडविया अवोचत् यत् अयं कार्यक्रमः राजनीतिक- सम्पर्कं विना राजनीतौ एक-लक्ष-युवानः सम्मिलितुं प्रधानमन्त्रिणः स्वाधीनता-दिवसस्य आह्वानस्य अनुरूपः वर्तते। तेनोक्तं यत् युवभिः सह संवादस्य अनन्तरं सर्वकारः विविध-वार्षिक-नेतृत्वेन सामाजिक सेवा कार्यक्रमान् आयोजयिष्यत। सर्वकारः तेभ्यः राष्ट्रियम् अन्तराष्ट्रियं च मञ्चं प्रदास्यति। डॉ0 मांडविया अवोचत् यत् युवभिः संवादेन प्रतिष्ठित-जनानां मार्गदर्शनं प्रप्यते।

**प्रधानमन्त्री अयोध्या**

अयोध्यायां श्रीराम-जन्मभूमि-मन्दिरे रामलला-प्रतिष्ठायाः वर्षपूर्तौ त्रि-दिवसीयः प्रतिष्ठा द्वादशी उत्सवः अद्य आरब्धः। अस्मिन् अवसरे श्रीराम-मन्दिरे पञ्च-सहस्र-किलोग्राम-परिमितैः पुष्पैः सुसज्जितम्। दिनत्रये भगवतः श्रीरामस्य विशेषार्चनं विधीयते। प्रधानमन्त्रिणा नरेन्द्रमोदिना अयोध्यायां रामलला-प्राण-प्रतिष्ठायाः वर्षपूर्तौ देशवासिभ्यः शुभकामनाः प्रदत्ताः। प्रधानमन्त्री

एकस्मिन् सामाजिक-सञ्चार-पटले अवदत् यत् इदं मन्दिरं शताब्दानां त्यागस्य तपस्याः सङ्घर्षस्य च अनन्तरं निर्मितम्। तेनदम् अस्माकं संस्कृतेः अध्यात्मस्य च महत् रिक्थं प्रतिपादितम्।

## गृहमन्त्री मादक-पदार्थः

गृहमन्त्री अमित-शाहः देशे मादक-पदार्थनां समस्यायाः निराकरणाय केन्द्रस्य राज्य-सर्वकाराणां च दृढ-प्रयासानाम् आह्वानम् अकरोत् । केन्द्रीय-गृहमन्त्री अमित-शाहः अद्य राजधान्यां नव- दिल्ल्यां मादक-पदार्थ-तस्करणं राष्ट्रीय-सुरक्षां च सम्बद्धस्य क्षेत्रीय-सम्मेलनस्य अध्यक्षताम् अकरोत्। स्वापक- नियंत्रण-ब्यूरो इत्यनेन आयोजितस्य अस्य सम्मेलनस्य उद्देश्यम् अष्ट-राज्येषु उत्तर-भारतस्य केन्द्रशासित-प्रदेशेषु च विशेषावधानम् सममेव मादक-पदार्थ-तस्करणम् उद्दिश्य चिन्ता राष्ट्रिय-सुरक्षायां च अस्य प्रभावः इति वर्तते।

श्रीशाहेनोक्तं यत् प्रायः चतुर्विंशतिः लक्ष-किलोग्राम-परिमिताः मादक-पदार्थाः निगडिताः। विगतेषु दश-वर्षेषु अष्टशतोत्तर-षड्-पञ्चाशत्-सहस्र-कोटि-रूप्यतोप्यधिकानां मूल्यानां मादक-पदार्थाः विनष्टीकृताः। अत्रावसरे गृहमन्त्रिणा स्वापक-नियन्त्रण- ब्यूरो इत्यस्य भोपाल-क्षेत्रीय नूतन-कार्यालय-परिसरम् अपि उद्घाटितम्।

अवधेयं यत् ड्रग डिस्पोजल पखवाड़ा इति अभियानम् अद्यारभ्य जनवरी मासस्य पञ्चविंशति-दिनाङ्कं यावत् प्रचलिष्यति। अस्मिन् अवधौ एकादशोत्तर-चतुश्शताधिक-द्वि-सहस्र-कोटि-रूप्यकाणां द्वि-नवत्युत्तर-सप्त-शताधिक-चतुश्चत्वारिंशत् किलो-ग्राम-भार-परिमिताः पूर्व-निगडिताः मादक-पदार्थाः नष्टाः भविष्यन्ति।

## उपराष्ट्रपतिः कर्णाटके

उप-राष्ट्रपतिः जगदीप-धनखड़ः प्रावोचत् यत् परीक्षाणां साक्षात्काराणां सञ्चालने पारदर्शिता सार्वजनिकोत्तरदायित्वं च न केवलं निष्पक्षं भवितव्ये अपितु निष्पक्षं द्रष्टव्ये च । अद्य बेगलुरु-नगरे राज्य-लोक-सेवायोगानाम् अध्यक्षाणां पञ्च-विंशे राष्ट्रिय-सम्मेलने औद्घाटनिकोद्बोधने अमुनोक्तं यत् प्रशासनिक-व्यवस्था अस्माकं संवैधानिक-दृष्टेः संरक्षिका अपि वर्तते। उपराष्ट्रपतिना लोक-सेवकेभ्यः अभिभावकैः समं कार्याचरणस्य आह्वानं कृतम्। इमे अस्माकं देशस्य भविष्यत् कालिकम् आधारं निर्मान्ति।

तेनोक्तं यत् इदं पूर्व-राष्ट्रपतेः डॉ.राजेन्द्र-प्रसादस्य दृष्टिकोणम् आसीत् यत् एकः स्वतंत्रः आयोगः निर्मातव्यः यो हि कार्यकारी प्रभाव-मुक्तं स्यात्। उपराष्ट्रपतिना लोक-सेवायोगान् एकमात्रम् एकीकृत-नियुक्ति-प्राधिकरण-रूपे स्थापितुम् आह्वानं कृतम्। यत् हि राज्यानां केन्द्र-सर्वकारस्य च मध्ये समन्वयस्य भावनया कार्यं करोति।

## दिल्ली-निर्वाचनम्

दिल्ली विधानसभा निर्वाचनात् प्राक् आम आदमी पार्टीति दलस्य भाजपेति दलस्य च मध्ये आरोप-प्रत्यारोप-प्रकरणं सञ्जायते। भाजपा दलेन आम आदमी पार्टीति दलस्य नेतृत्व-युतस्य दिल्ली सर्वकारस्य कथित-भ्रष्टाचार-विषयकं गीतं प्रसारितम्। राजधान्यां नवदिल्लयां वार्ताहर-सम्मेलने प्रदेश-भाजपाध्यक्षः वीरेन्द्र सचदेवा अधिक्षिपत् यत् पूर्वमुख्यमत्रिणा अरविन्द-केजरीवालेन न केवलं दिल्ली वासिभ्यः मिथ्यालापः कृतः अपितु नागरिकाणाम् अपि अहितं कृतम्।

## ऋतु-सङ्केतना

सघन-कुज्झिटिका-कारेणन उत्तर-पश्चिम-भारते आगामिदिनद्वयं यावत् विद्युद्गर्जनेन सहैव वृष्टेः सम्भावना अपि विद्यते। ऋतुविभागेन पश्चिम- विक्षोभस्य कारणेन श्वः यावत् उत्तर-पश्चिम-भारतस्य केषुचित् भागेषु वर्षा-हिमपातयोः सम्भावनायाः पूर्वानुमानं कृतम्। आकाशवाण्याः सह वार्तालापे ऋतुविभागस्य वैज्ञानिकः डॉ. सोमा सेनः प्रोक्तवती यत् उत्तरक्षेत्रेषु अस्य मासस्य चतुर्दश-दिनाङ्कपर्यन्तं प्रातः रात्रौ च सघन-कुज्झटिकायाः स्थितिः भवितुं शक्ष्यते। उपहिमालयीय-पश्चिमबङ्गे, सिक्किमे, बिहारे, ओडिशायां, पूर्वोत्तरे च श्वः यावत् एतादृश्यः एव परिस्थितयः प्रचलन्ति इति अपेक्षा अस्ति। राष्ट्रिय-राजधान्यां सघन-नीहारस्य स्थितिमवलोक्य पीत-वर्णीय-सङ्केतनापि प्रसारितास्ति।

## सिङ्गापुरराष्ट्रपतेः भारतयात्रा

सिङ्गापुरस्य राष्ट्रपतिः थर्मन्- षणमुगरत्नम् इत्येषः जनवरी चतुर्दश दिनात् जनवरी अष्टादश दिनांक-पर्यन्तं भारतस्य यात्रायां भविष्यति । दश वर्षेषु कस्यापि सिङ्गापुरस्य राष्ट्रपतेः भारतस्य एषा प्रथमा आधिकारिका यात्रा भविष्यति। षण्मुग-रत्नम् इत्यस्य यात्रया भारत-सिङ्गापुरयोः मध्ये कूटनीतिकसम्बन्धानां षष्ठिः वर्षाणि पूरितानि भविष्यन्ति। यात्रावधौ सः राष्ट्रपतिना द्रौपदी मुर्मू वर्यया, प्रधानमन्त्रिणा नरेन्द्रमोदिना च सह मेलनं करिष्यति।

## बैडमिण्टन्

मलेशिया-ओपन्-बैडमिण्टन् प्रतिस्पर्धायां पुरुष-युगल-वर्गे उपान्त्यचक्रे दक्षिण-कोरिया-दलेन भारतस्य सात्विक-साई-राज-रेंकी-रेड्डी चिरागशेट्टि इत्यनयोः दलं पराजितम्। क्वालालम्पुर-नगरे क्रीडितायां स्पर्धायां दक्षिण-कोरिया-दलेन दश-एकविंशतिः पञ्चदश-एकविंशतिः इत्याङ्कान्तरालेन भारतीय-युगलं पराजितम्।

॥ इति वार्ता:॥